# सङ्कलनात्मकं मूल्याङ्कनम् - II (2016-17)

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - नवमी

समय : होरात्रयम् पूर्णाङ्काः 90

**निर्देशाः**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः

खण्डः (ख) रचनात्मक-कार्यम् - 15 अङ्काः

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 30 अङ्काः

खण्डः (घ) पठित-अवबोधनम् - 35 अङ्काः

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क' अपठित-अवबोधनम् - (10 अङ्काः)

1 **अधोलिखितम् गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत।(2+2+4+2)** 10

नर्मदातीरे एकः विशालः वृक्षः आसीत्। तत्र अनेके खगाः नीडानि रचयित्वा सुखेन अवसन्। एकदा महती वृष्टिः अभवत्। तस्मिन् एव काले कश्चित् वानरः वृष्टिजलेन आर्द्रः कम्पितः च सन् तत्र आगच्छत्। सः तस्य वृक्षस्य अधः उपाविशत्। शीतेन कम्पमानं तं वानरं दृष्ट्वा खगाः कष्टम् अन्वभवन्। ते तं वानरं करुणया अवदन्-भो वानर! त्वं कष्टम् अनुभवसि? त्वं किमर्थं स्वगृहं न रचयसि? तेषां खगानां वचनानि श्रुत्वा सः वानरः क्रुद्धः अभवत् अचिन्तयत् च - ''एतेखगाःमामुपहसन्ति।'' तदनन्तरं सः वृक्षम् आरुह्य तेषां खगानां नीडानि खण्डशः कृत्वा भूमौ अक्षिपत्।

I. **एकपदेन उत्तरत।**

(i) वृक्षः कुत्र आसीत्?

(ii) वानरेण कुत्र आरुह्य नीडानि खण्डशः कृतानि?

II. **पूर्णवाक्येन उत्तरत।**

(i) वानरः किम् अचिन्तयत्?

(ii) खगाः किं दृष्ट्वा कष्टम् अन्वभवन्?

III. **निर्देशानुसारम् उत्तरत।**

(i) 'शुष्कः' इति शब्दस्य विलोमपदम् अनुच्छेदात् चित्वा लिखत?

(अ) क्रुद्धः (ब) आर्द्रः

(स) सुखः (द) वृष्टिः

(ii) मर्कटः इत्यर्थे किम् पदं प्रयुक्तम्?



Scanned by CamScanner

(अ) वानर: (ब) खग:
(स) वृक्ष: (द) कष्ट:

(iii) 'उपहसन्ति' इति क्रियापदस्य कर्ता: क: ?
(अ) माम् (ब) एते
(स) खगा: (द) वानरा:

(iv) 'नर्मदातीरे ------------।' अत्र विशेष्यपदं किम् ?
(अ) वृक्ष: (ब) विशाल:
(स) एक: (द) तीरे

IV. **अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।**

## खण्ड: 'ख' रचनात्मक-कार्यम् - ( 15 अङ्का: )

2 भवत: नाम कुलेश: अस्ति छात्रावासे च भवान् वसति। अजन्ता-एलोरा गुहासु शैक्षिकयात्रायै गन्तुम् इच्छति। धनप्रेषणार्थं पितरं प्रति लिखिते पत्रे मञ्जूषात: उचितपदानि विचित्य रिक्तस्थानानि पूरयत। 5

गौतमी छात्रवास:
(i) ..........
दिनांक ..........

परमादरणीया: (ii) ..........
सादरं प्रणमामि।

सविनयं (iii) .......... यत् मम त्रैमासिकी परीक्षा समाप्ति गता। मम (iv) .......... शोभनानि अभवन्। अस्मिन् (v) .......... अहं गृहं न आगमिष्यामि यत: विद्यालयेन एकस्या: (vi) .......... प्रबन्ध: कृत:। -

एषा यात्रा अजन्ता-(vii) .......... –गुहानां दर्शनाय आयोजिता अस्ति। यात्राव्ययार्थम् (viii) .......... रूप्यकाणि प्रेषयन्तु भवन्त:। शेषं सर्वम् कुशलम्। (ix) .......... अग्रजाय च मम सादरं प्रणामा:।


भवदीय: (x) ..........
कुलेश:

**मञ्जूषा :** शरदवकाशे, जनन्यै, एलोरा, प्रियपुत्र:, उत्तरपत्राणि, अष्टशतं, दिल्लीनगरात्, शैक्षिकयात्राया:, निवेदयामि, पितृमहाभागा:।

3 अधोदत्तं चित्रं दृष्ट्वा संस्कृतेन पञ्च वाक्यानि लिखत। (2x5=10) 10



Scanned by CamScanner



मञ्जूषा
संगणकम्, विकलांगबालकाः, पठनम्, क्रीडनम्, आधुनिकरीत्या, बालकः, बालिका, स्वावलम्बिनः, सहायकः, कुरुत, गुटकफलकम्, मूकः, बधिरः।

अथवा

**'वृक्षाः अस्माकं सहायकाः'** इति विषयम् अधिकृत्य संस्कृतेन पञ्चवाक्यानि लिखत।(2x5=10) 10
**मञ्जूषा**–वृक्षाः, सत्पुरुषाः, परोपकारम्, फलानि, छाया, पुष्पाणि, गृहाणां कृते काष्ठम्, विश्रामं, भूमेः संरक्षणम्, वृक्षाः रोपणीयाः।

**खण्डः 'ग' अनुप्रयुक्त व्याकरणम् - ( 30 अङ्काः )**

4 **उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत।** 6

(i) युवाम् ………………… पश्यताम्।
(अ) आत्मनाम् (ब) आत्मानौ (स) आत्मनः (द) आत्मा

(ii) सा ………………… कुमारान् अपश्चत्।
(अ) गच्छन् (ब) गच्छन्तं (स) गच्छतः (द) गच्छन्तौ

(iii) सः ………………… अपश्यत्।
(अ) राजा (ब) राजानम् (स) राज्ञे (द) राज्ञः

(iv) राजा ………………… धनानि यच्छति।
(अ) विदुषे (ब) विदुषा (स) विदुषः (द) विद्वान्

(v) ………………… दर्शनानि कदा भविष्यन्ति।
(अ) भवति (ब) भवता (स) भवताम् (द) भवान्

(vi) द्वयोः ………………… सम्मेलनं जातम्।
(अ) आत्मनः (ब) आत्मन् (स) आत्मनोः (द) आत्मानम्

5 **उचितसंख्यापदैः रिक्त स्थानानि पूरयत।**
(i) अस्मिन् कक्षे ……………… व्यजनानि चलन्ति। (पञ्चन्)
(ii) अस्याम् कक्षायाम् ……………… भित्तिचित्राणि सन्ति। (चतुर्)



Scanned by CamScanner

(iii) अस्मिन् वर्गे .................. संगणकः अस्ति। (एक)

(iv) सभागारे .................. वातानुकूलनयन्त्राणि सन्ति। (त्रि)

(v) मम गृहे .................. पुत्रौ स्तः। (द्वि)

(vi) मम गृहे .................. श्वसा अपि अस्ति। (एक)

6 **प्रदत्तविकल्पेभ्यः उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत।** 6

(i) बाला: निर्धनेभ्यः धनं ................ ।

(अ) याचेरन् (ब) याचेताम्

(स) याचै (द) याचेत

(ii) शिशुः फलानि ................ ।

(अ) भक्षयन्तु (ब) भक्षयतु

(स) भक्षयत (द) भक्षय

(iii) सः ईश्वरं प्राप्तुम् ................ ।

(अ) इच्छेताम् (ब) इच्छेः

(स) इच्छेत् (द) इच्छेयुः

(iv) त्वम् सदैव देवं ................ ।

(अ) भजयाताम् (ब) भजेरन्

(स) भजेय (द) भजेथाः

(v) बालिकाः श्वसुरालये ................ ।

(अ) मोदताम् (ब) मोदन्ताम्

(स) मोदै (द) मोदस्व

(vi) सः सर्वदा सर्वेषां मंगलम् एव ................ ।

(अ) चिन्तयतु (ब) चिन्तय

(स) चिन्तयन्तु (द) चिन्तयत

7 **उचित-उपपदविभक्तीनां प्रयोगं रिक्तस्थानेषु कुरुत।** 6

(i) नृपः ................ प्रति गच्छति।

(अ) राजभवने (ब) राजभवनः

(स) राजभवनाय (द) राजभवनम्

(ii) ................ विना नरः न शोभते।

(अ) ज्ञानेन (ब) ज्ञानस्य

(स) ज्ञानेषु (द) ज्ञानाय

(iii) ................ कोऽपि न विश्वसिति।

(अ) दुष्टजनम् (ब) दुष्टजनेषु

(स) दुष्टजनः (द) दुष्टजनाय

(iv) ................ वामतः पुस्तकालयः अस्ति।



Scanned by CamScanner

(अ) प्रयोगशालाया: (ब) प्रयोगशाला

(स) प्रयोगशालाम् (द) प्रयोगशालाय

(v) ............... अनन्तरम् अहम् उद्याने भ्रमामि।

(अ) भोजनम् (ब) भोजनात्

(स) भोजनस्य (द) भोजने

(vi) प्राणिनः ............... स्नेहो भवति।

(अ) स्वापत्येषु (ब) स्वापत्यम्

(स) स्वापत्याः (द) स्वापत्यः

8 अधोलिखितेषु वाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। 6

(i) **पठन्त्यौ** छात्रे न हसतः।

(अ) पठ् + शतृ (ब) पठ् + शानच्

(स) पठ् + क्त (द) पठ् + क्तवतु

(ii) अहं कथां **पठितवान्**।

(अ) पठ् + क्त (ब) पठ् + शतृ

(स) पठ् + क्तवतु (द) शानच्

(iii) कन्यया भोजनम् **पक्वम्**।

(अ) पच् + शतृ (ब) पच् + क्त

(स) पच् + क्तवतु (द) पच् + शानच्

(iv) बालाः कथां ...................। (श्रु + क्तवतु)

(अ) श्रुतवान् (ब) श्रुतवती

(स) श्रुतानि (द) श्रुतवन्तः

(v) ................... महिलाः वार्तालापं कुर्वन्ति। (पच् + शतृ)

(अ) पचन्ती (ब) पचन्त्यौ

(स) पचन्त्यः (द) पचन्

(vi) पुरस्कारं ................... बालाः मोदन्ते। (लभ् + शानच्)

(अ) लभयानम् (ब) लभमानः

(स) लभमानाः (द) लभमाने

## खण्ड : 'घ' पठित-अवबोधनम् - 35 अङ्काः

9 **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि उत्तर-पुस्तिकायां लिखत।(2+1+2)** 5

धर्मव्याधः अवदत् - "ब्रह्मन् ! अहं मातापित्रोर्भक्तः । तौ हि मम परायणम्। अहं तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनं स्वीकरोमि। शाययित्वा च स्वपिमि। तेन मे एतादृशं विज्ञानम्। अन्यहतानां मृगादीनां मांसानि स्वधर्मं मत्वा वृत्त्यर्थं विक्रीणे, न तु धनलिप्सया।

I. एकपदेन उत्तरत।

(i) कौ मम परायणम् स्तः ?



Scanned by CamScanner

(ii) धर्मव्याधः पितरौ किं कृत्वा भोजनं स्वीकरोति ?

II. पूर्णवाक्येन उत्तरत।

''धर्मव्याधः कयोः भक्तः आसीत् ?

III. भाषिककार्यम् :-

(i) ''स्नापयित्वा स्नामि.................।'' 'स्नामि' इति क्रिया-पदस्य गद्यांशे किं कर्तृपदं प्रयुक्तम् ?

(अ) अहम् (ब) धर्मव्याधः

(स) मृगः (द) तौ

(ii) ''ज्ञात्वा'' इत्यर्थे गद्यांशे किम् पदं प्रयुक्तम् ?

(अ) तेन (ब) हतानाम्

(स) मत्वा (द) वृत्त्यर्थम्

10. **अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत :-(2+1+2)** 5

जाह्नवीचन्द्रभागाजलैः पावितम्

भानुजानर्मदावीचिभिर्लालितम्

तुङ्भद्राविपाशादिभिर्भावितम्

भूतले भाति मेऽनारतं भारतम्।

I. एकपदेन उत्तरत।

(i) काभिः भारतं भावितम् ?

(ii) भूतले किम् भाति ?

II. पूर्णवाक्येन उत्तरत।

भारतं कासां जलैः पावितम् विद्यते ?

III. भाषिककार्यम्- (i) 'गङ्गा' इति पदस्य पर्यायपदम् अस्ति ?

(अ) यमुना (ब) जाह्नवी

(स) कावेरी (द) नर्मदा

(ii) 'भारतम्' इति कर्तृपदस्य क्रियापदं किम् ?

(अ) भूतले (ब) भाति

(स) अनारतम् (द) भावितम्

11 **अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -(2+1+2)** 5

**भोजः** अनुगृहीतोऽस्मि! कुतः समागमनम् अत्रभवताम्?

**लक्ष्मीधरः** राजन्। यत्र जलपूर्णं सरः भवति, तत्र पक्षिणः स्वयं समायान्ति। अहमपि भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि। भवद्राज्ये निवस्तुम् इच्छामि।

**भोजः** ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः। (मन्त्रिणं प्रति) मन्त्रिवर!



Scanned by CamScanner

नगरपालं समाहूय आदिश्यतां यत् स लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु। नगरे कृतनिवासम् अपठितं जनं निःसार्य तद्गृहे एष पण्डितवरः, वासयितव्यः।

I. एकपदेन उत्तरत।

(i) यत्र जलपूर्णं सरः भवति तत्र के समायान्ति?

(ii) लक्ष्मीधरः कस्य राज्ये निवस्तुम् इच्छति?

II. पूर्णवाक्येन उत्तरत।

भोजः लक्ष्मीधरविदुषे निवासव्यवस्थां कारयितुम् कं कथयति?

III. भाषिककार्यम्।

(i) 'विभूषयेयुः' इत्यस्य कर्तृपदं किम्?

(अ) परिषदम् (ब) भवादृशाः (स) भोजः (द) विद्वांसः

(ii) 'निवासं करणाय' इति अर्थे किं पद प्रयुक्तम्?

(अ) निवस्तुम् (ब) समाहूय (स) निःसार्य (द) समाकर्ण्य

12 **अधोलिखितश्लोकयोः अन्वययोः रिक्तस्थानानि पूरयत।( ½ x 10 =5)** 5

(क) मूलं भुजंगैः शिखरं प्लवङ्गैः शाखा विहंगैः कुसुमानि भृङ्गैः।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्त्वभरैः समन्तात्।।

**अन्वयः -** भुजङ्गैः मूलम् प्लवङ्गैः (i)____ विहंगैः शाखाः (ii)____ कुसुमानि (आश्रितानि) (iii)____ तत् नएव अस्ति(iv) ____ समन्तात् सत्त्वभरैः न (v) ____ ।

(ख) छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव।।

**अन्वयः -** (i)____ छायाम् कुर्वन्ति। (ii)____ आतपे (iii)____ फलानि (iv)____ परार्थाय (सन्ति) (v)____ सत्पुरुषाः इव।

13 **रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 5

(i) रेखागणितस्य 'पाइथोगोरस' नाम सिद्धान्तः <u>शुल्वसूत्रेषु</u> पूर्वमेव निरूपितः।

(ii) प्राचीना भारतीयविज्ञानपरम्परा <u>उत्कृष्टा</u> आसीत्।

(iii) 'सर्वे भवन्तु सुखिनः' इति <u>भारतीय-सभ्यतायाः</u> मूलमन्त्रम् अस्ति।

(iv) जलमूलम् अन्विष्यता स्वातिमुनिना <u>आह्लादकरः</u> शब्दः श्रुतः।

(v) अग्रे गत्वा <u>पर्वतात्</u> पततः जलबिन्दून् अपश्यत् सः।

14 **अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत।(½ x 10 = 5)** 5

(1) पुत्रः अवदत् - "चिन्ताम् मा कुरु अहम् तत्र गमिष्यामि।"

(2) सर्वे तस्य वक्रदेहं दृष्ट्वा उच्चैः अहसन्।

(3) एकदा बालः अष्टवक्रः मित्रैः सह क्रीडित्वा गृहम् प्रति आगच्छत्।

(4) मातुः अनुमत्या सः राजसभाम् अगच्छत्।

(5) सः मातरम् अपृच्छत् "पिता कुत्र अस्ति" इति।



Scanned by CamScanner

(6) सर्वे विद्वांसः तम् हसन्तम् दृष्ट्वा विस्मिताः जाताः।
(7) अष्टावक्रः अपि तान् पण्डितान् दृष्ट्वा उच्चैः अहसत्।
(8) अष्टावक्रस्य शास्त्रपांडित्येन सर्वे प्रभाविताः जाताः।
(9) शास्त्रार्थं कृत्वा स्वज्ञानेन सः सर्वान् पण्डितान् अजयत्।
(10) माता प्रत्यवदत्, "सः शास्त्रार्थाय राजर्षेः जनकस्य सभाम् अगच्छत्।"

15 **रेखाङ्कितशब्दानाम् अर्थान् विकल्पेभ्यः चित्वा लिखत।** 5

(i) मुनिः <u>पिपासया</u> पीडितोऽभवत्।

(अ) जलेन (ब) तृषया (स) शुष्केण

(ii) तेन कश्चन <u>आह्लादकरः</u> शब्दः श्रुतः।

(अ) व्याकुलः (ब) आनंदकरः (स) कोलाहलः

(iii) तम <u>अनुसृत्य</u> स अग्रे गतः।

(अ) अनुसरणं कृत्वा (ब) चोरयित्वा (स) अध्यास्ते

(iv) तत्र <u>कुत्रचित्</u> पर्वतात् जलबिन्दवः पतन्ति।

(अ) कस्यचित् (ब) अपरिचितस्थानात् (स) उच्चस्थानात्

(v) तत्र मधुरं संगीतं <u>जनयन्ति</u> स्म।

(अ) ज्ञापयन्ति स्म (ब) उत्पादयन्ति स्म (स) जानन्ति स्म

-o0o0o0o-



Scanned by CamScanner